International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 177-180
© 2023 IJSR
www.anantaajournal.com
Received: 15-07-2023
Accepted: 20-08-2023

**डॉ. धीरेन्द्र कुमार झा**
ग्राम+पत्रालय- सुगौना, भाया- राजनगर, जिला' मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. धीरेन्द्र कुमार झा**
ग्राम+पत्रालय- सुगौना, भाया- राजनगर, जिला' मधुबनी, बिहार, भारत

# सत्यव्रत शास्त्रिण: काव्येषु लोक चेतना

## डॉ. धीरेन्द्र कुमार झा

**सारांश**

विंशशतकस्य समारम्भात् संस्कृतसाहित्ये सामान्यजनानां कृते अधिकारचेतना जजागार। नैके संस्कृतसाहित्यकाराः स्वतन्त्रता-सङ्ग्रामे मनसा वाचा कर्मणा आसन् संलग्नाः। अप्पाशास्त्रिराशि- वडेकरेण सम्पादिता सूनृतवादिनी संस्कृतचन्द्रिका चाङ्ग्लशासन- विरोधे बद्धपरिकरे बभूवतुः। एते पत्रिके तु तस्मात् शासनात् स्वराज्याधिकारं याचमाने प्रतिबन्धिते निरुद्धे च। विक्टोरिया- घोषणापत्रम् अप्पाशास्त्री सुनृतवादिन्याः 1.15 तमे ऽङ्के प्रशशंस, यतो हि तत्र भारतीयानां कृते मौलिका अधिकारा प्रतिश्रुता आसन्। परं परस्तात् तद्घोषणपत्रं वाग्जालमात्रं निरर्थकमाडम्बरभूत चासीदित्यनुभूय अप्पाशास्त्री संस्कृतचन्द्रिकाया 14.4-9 अङ्कस्य सम्पादकीये लिलेख-

"खीष्टीयानां 1857 तमे वत्सरे श्रीमत्या महाराज्ञया
घोषणापत्रद्वारा प्रकाशिताः प्रतिज्ञाः न पूरिताः।"

**कूट शब्द:** तद्घोषणपत्रं, निरर्थकमाडम्बरभूत, चासीदित्यनुभूय, अप्पाशास्त्री

**प्रस्तावना**

विंशशताब्धा उत्तरार्धे समाजवादस्य साम्यवादस्य विचारधारा संस्कृतसाहित्यरचनाप्रवाहे सङ्गमिता। तेन च मानवाधिकारचेतना समधिकतरं दृढीयसी भूत्वा संस्कृतरचनासु प्रतिफलिता। पारम्परिका अपि पण्डिता महाकाव्यादिरचनासु नास्मात् प्रवाहादात्मानं पृथक्कर्तुं शेकुः। बहवश्च बभूवुः संस्कृतरचनाकाराः येषां कृतित्वे वैयक्तिकस्वातन्त्र्यस्य साधारणजनतायाश्च कृते स्वाधिकारप्रदानस्य भावना सविशेषमुनमिषत्। तदित्थं महाकाव्येषु, रूपकेषु, लघुकाव्येषु वा अस्मिन् शतके परसहस्रं विरचितेषु विशिष्य मानवाधिकारचेतना जागर्ति, यस्या दिङ्मात्रं निर्देश इह विधीयते।

**महाकाव्येषु मानवाधिकारचेतना:** आधुनिककाले बहूनि महाकाव्यानि परम्परिकरीत्या पौराणिकं वा विषयवस्तु अवलम्ब्य विरचितानि। परन्त्वेतादृशमहाकाव्येष्वपि आधुनिकदृशा प्राजातन्त्र्यभावस्य मानवाधिकारचेतनायाश्च अभिव्यक्तिर्दरीदृश्यते। अद्यथाः काशीनाथस्य रूक्मिणीहरणे प्रभुदत्तशास्त्रिणो गणपतिसम्भवे वा। काशीनाथः स्वकीये रूक्मिणीहरणमहाकाव्ये श्रीकृष्णमुखात् समानताधिकारमित्थं घोषयाम्बभूव-

जनेषु कस्मान्न विभज्यते समं समानरूपेण समीहित वसु।
न कस्यचित् यत् सहजं समीक्ष्यते न कोऽपि तन्नाधिकृता विशेषभाक्।। (11/88)

यानि महाकाव्यानि आधुनिकविषयानवलम्ब्य रचितानि, तेषु मानवाधिकारचेतना स्फुटं जागर्ति। विशेषतः परमानन्दशास्त्रि-रेवा- प्रसादद्विवेद-पद्मशास्त्रि-प्रभृतीनां महाकाव्येषु। तत्रापि पद्मशास्त्रिणो लेनिनामृते परमानन्दशास्त्रिणो जनविजयमहाकाव्ये च प्रत्यक्षमेव नूतनयुगबोधपुरस्सरं मानवाधिकारचेतनां सुतराभिव्यानक् कविः। जनविजयं महाकाव्यमापातकालस्यैतिह्यं वृत्तान्तं कृतान्तसमांश्चात्या- धारान् प्रत्यक्षदृष्टिनिभं साक्षात्कारयति।

मुहुर्मुहू रक्षिगणा उपेत्य
प्रच्छापरास्तानति तर्जयन्ति।
अप्यागतांस्तान् मिलितु शठास्ते
वज्रै: प्रकारैः परिखेदयन्ति।।
पश्चाल्लगन्ति प्रहरन्ति यान्ति
गृहणन्ति भूयोऽपि कदर्थयन्ति।
प्रच्छन्ति कुप्यन्ति नुदन्ति दूरं
तुदन्ति सन्तर्ज्य विमानयन्ति।। (9/30, 31)

अत्र आपातकाले अधिकाराणां स्थगनं विशिष्य विषयीकृतम्। समस्तोऽपि देशः कारागार इव तदानीं समजनि। आतङ्केन शशास शासयित्री। भयं सर्वत्र व्याधिरिव प्रससार।

सर्वत्र भीतहृदया मनुजा मनाङ् नो
मनी उत्सोहिरे कथयितुं क्वचिदेकशब्दम्।
इष्टेषु मित्रसुजनेष्वपि संशयाना-
श्धारा यता प्रतिपदं व्यचरन् हि तस्याः।
देशो निलम्बितसमस्तजनाधिकारः
किं न प्रतीयत इव स्म विशालकारा।
कारा निलम्बितसमस्तजनाधिकारा
देशस्य किं नहि मता विहितानुकारा।। (8/66, 67)

पद्मशास्त्रिणो महाकाव्यस्य सप्तमसर्गे जनताकृत जारशासन- विरोधचित्रणे अष्टमसर्गे च बोत्शेविकदलस्य विजयनिरूपणे विशिष्य मानवाधिकारचेतना समुल्लसति।

**नाटकेषु मानवाधिकारचेतना:** शतकस्यास्य प्रथम एव दशके विरचिते सुन्दरराजस्य स्नुषाविजयरूपके नारीस्वातन्त्र्यभावः नार्ये अधिकारप्रदानाय प्रबल आग्रहः प्रकटीकृतो नाट्यकृता। परस्ताद् रचितेषु रूपकेषु वीरेन्द्रकुमारभट्टाचार्यस्य शार्दूलशकटं वेष्टनव्या- योगश्च श्रमिकाणां कर्मकराणां च स्वाधिकारप्राप्त्यर्थं विधीयमानं सङ्घर्षं विषयीकुरुतः। अभिराजराजेन्द्रस्य द्विसन्धानप्रभृतिरूपकेषु प्रतारितं नारीत्वं अधिकारावाप्तये चेष्टते। हन्यमानां मातरं प्रच्छन्ना विलोकयति धावित्वा च स्वयमेव समीपवर्तिपुलिसस्थानकं प्राप्य वृत्तमिदं पुलिसनिरीक्षकाय सूचयति, तेन च रक्ष्यते तदीया माता दारुणवधात्। एतेनाधिकारचेतना कथं बालकेष्वपि प्रसारं प्राप्नोतीति गम्यते। हरिदत्तशर्मणः त्रिपथगायां सङ्कलिते नाट्यत्रये वधूदहनम् नाम रूपकमपि विषयममुं प्रस्तौति।

**निबन्धेषु गद्यबन्धेषु च मानवाधिकारचेतना:** विशेषतो हृषीकेशभट्टाचार्य-रामावतारशर्मप्रभृतीनां निबन्धेषु मानवाधिकार- चेतना दरीदृश्यते। हृषीकेशभट्टाचार्यो विद्योदये स्वोपज्ञान् बहून् ललितनिबन्धान् प्रकाशयामास। तत्र प्राप्तपत्रम् इति निबन्धे अनामिकां नाम कामपि देवीं परिकल्प्य पत्रद्वारेण नारीणां व्यथां वर्तमानकाले नारीणामधिकारचेतनां अधिकारहननं चासा पुरुषैरिति विषयमयं मर्मस्पृशं निरूपयति। तद्यथा— "अहो विचित्रमेतत्। अन्यत्र देशेषु प्रथमावस्थायामेवाबलानां दुर्गतिः श्रूयते। अथ यथा यथा धर्मबुद्धैराविर्भावः सभ्यताया विस्तृतिश्च तथा तथैव स्त्रीणामप्युन्नतिर्जाता। भारते तु सर्वथा तद्वैपरीत्यमिति। यतो ऽत्र स्मार्तसमयादारभ्यैव स्त्रीणां चरणौ सुदृढं नियन्त्रितौ। खिलीभूताश्च चिराय तासां समुन्नतो पन्थानां, सन्निरुद्धश्चाशेषतः श्रेयसां मार्गः, संरोपितमवरोधबन्धनस्य मूलं, निक्षिप्तश्चासामुपरि सुदुस्सहपुरुषा- धिपत्यक्लेश-प्रवाहः।"

**कथा साहित्ये मानवाधिकारचेतना:** विशेषतो क्षमाराव-राजेन्द्रमिश्रादिभिः प्रणीतासु लघुकथासु। क्षमादेवी नारीस्वातन्त्र्यस्य नारीणामधिकारचेतनायाः उद्घोषत्वेन महनीया वरीवृत्यते। कथामुक्तावली ग्रामज्योतिः कथापञ्चकम् इति सङ्ग्रहेष्वस्याः कथाः भारतीयजनतायाः अधिकारचेतनायाः समुज्ज्वलं निदर्शनं पुरस्कुर्वन्ति ।

**मुक्तककाव्येषु मानवाधिकारचेतना:** भट्टमथुरानाथशास्त्रिणः साहित्यवैभवे सन्ति नवीनानि बहूनि छन्दांसि येषु नवयुगबोधो ध्वनितः, तत्रैव जनसाधारणस्य कृते ऽपि प्रतिफलति कवेः सङ्घर्षः। श्रीधरभास्करवर्णेकरस्य श्रमगीताप्यत्र न नोल्लेखमर्हति। रामनाथपाठकप्रणयिनो राष्ट्रवाण्यां हरिदत्तपालीवालनिर्भयस्य च गीतेर्न केवलं स्वातन्त्र्यान्दोलनयज्ञाहुतवहा सन्धुक्षितो, मानवाधिकारचेतनापि तैरतितरां पोषिता। साम्प्रतिकसंस्कृतगीतेषु चेयमेव चेतना क्वचिद् ललितविन्यासपुरस्सरं तरलिता, क्वचिच्च विकटाक्षरबन्धेर्दुढतरं निर्बन्धं धारयन्ती प्रस्फुटिता। सरदारभगतसिंहस्य क्रान्तिकारिदलेन संबद्धौ चिरं कारागारेषु उषितः कविर्हरिदत्तपालीवालो यथा पराधीनभारतस्य स्वाधिकारप्राप्त्यर्थं प्रखरमाह्वानं हुङ्कृतिगर्भः शब्दैरभिव्यानक्, तथैव स्वतन्त्रे भारते जनताया दुर्दशां दर्श दर्शमसौवाह- स्वराज्यमागतं सुराजतापरन्तु नागतेति। क्वचिच्च लेखिन्या खरतरं प्रहरन्नयं लिलेख—

येषां श्रमसीकरो जगत् पालयते ते क्षुधिता नग्नाः
सीदन्ति सम्पदामीशत्वं चोच्छ्रमश्रुमुखं जनरक्तपिबम्।
मातरौ भगिन्यो मयेक्षिताः शीलं जहतीर्वसनादि विना
कणहेतोः शिशवोतिदुःखिताः परिवृत्ता जगतः स्थितिर्निहि।।

उमाशङ्करत्रिपाठिसदृशास्तेजस्विनः कतिपये कवयस्तु दलितचेतनां समर्मदारणं काव्याभिव्यक्तये स्वीचक्रुः। अस्पृश्यान्तर्नि- वेदितमिति खण्डकाव्ये उमाशङ्करस्तिपाठी 'अधूत' संज्ञकानां हरिजनानामन्त्यजानां वा वेदनामधिकारचेतनां च हृदयङ्गमा विधत्ते। वर्णव्यवस्थायाः तेजस्विप्रत्याख्यानमकारि उमाशङ्करेण त्रिपाठिना। यतो हि व्यवस्थेय चतुर्थस्य वर्णस्याधिकारान् हन्ति। संस्कृतकविषु एतादृशं ओजस्वी प्रत्याख्यानस्वरः सुदुर्लभ एव। तथाहि—

क्षुत्क्षामो ऽपि श्रयितुमखिलं जीवलोकं महात्मा
प्राणान् वर्णाश्रमहुतवहे दीनदीनं जुहोति।।

या वर्णव्यवस्था एकं तु सर्वाधिकारसम्पन्न विदधाति, अपर तु सर्वथा दीनहीनं विधत्ते सा सर्वथा गर्हितेति घोषयन् कविरयं कमपि साहसं प्रकटयति।

द्वादि क्षेत्रे विषमयिपथे सक्षमः कर्मसक्तौ
ब्रागुद्दिष्टो निकृतिपरमः सेवमानः सवर्णान्।
स्मारं स्मारं स्वनियतिफलं व्यस्तकल्याणवर्मा

यद्यस्पृश्यो मरणमधिकं काङ्क्षते कोऽत्र दोषः?।
कोऽसौ वर्णो ददत सुधियश्चित्रसिंहानुकारो
यद् दीनेषु ज्वलति रभसं सक्षमेष्वस्तमेति।
युक्तं गौरो यदि न मनुते श्रोत्रियं श्ववाधिकं यद्

वर्णश्रेष्ठा ! अपरमफलं रोचते किं भवद्भ्यः?
ग्रामाद् दूरे यमदिशि वसन् प्रेतभूमेः सकाशं
पायं पायं मलिनसलिलं कीटशम्बूककार्णम्।
दीर्घश्मश्रुग्लपितवदनो जीर्णकौपीनवासा-
श्चाण्डालोऽयं वा नरपरपशुरयं हिन्दुभाले कलङ्कः।।

कृषक इति उमाशङ्करत्रिपाठिनः कविता भारतीयकृषकस्य नियतिं निरूपयन्ती तस्याधिकारजागरूकतां जागरयति।

हत्वा हत्वा प्रतिपलमये लुण्ठका यस्य भाग्य
संस्तूयन्ते च्छलबलकलाः श्रेष्ठिनः शासका वा।
साधिक्षेपं कृतकसुहृदस्ते ऽपि सोत्प्रासमेनं
ग्रामीणं वा वृषभमथवा घोषयन्तो हसन्ति॥

अस्यामेव कवितायः शिक्षामन्दिरेषु मानवाधिकारहननं विषयीकृतं कविना।

यत्रानिच्छन्नपि जडमतिः पाठ्यते हेमपुत्रो
विद्याकामः कृषकतनयो रुध्यते ऽकिञ्चनत्वात्।
प्राजातन्त्र्ये गुरुरपि वटुं पाठितुं न स्वतन्त्रो
दैन्यं स्मपद् ललति परुषा शारदामन्दिरे ऽपि॥

चक्रिचूडामणिरिति काव्यमस्य कवेरनुपमेव रचना। यत्र रासभमाहात्म्यं निरूपयता कविना प्राजातान्त्रिके भारते स्वाधिकारच्युता जनता रासभेन तुलिता। नेता चात्र रासभपीडनरतो ऽधमो रजकः, यो दण्डाघातैरनिशं रासभरूपिणी प्रजामेनां प्रपीडयति-

नेता यो ऽसावधमरजको नित्यपानानुभावो
कालिन्यानां धुरि परिवहन् पृष्ठदेशासनोऽपि।
दण्डाघातैर्व्यवसितविधिर्घासमुष्टिं व्यकीर्य
प्राजातन्त्र्ये जनमिव खलस्त्वां कदर्थीकरोति॥

सर्वसहस्य रासभस्य अन्यैव कापि च्छविः कविना विनिर्मिता। तेनायं रासभः शोषितानां दीनानां जनानां प्रातिनिध्यमिह काव्ये निर्वहति।

वर्षद्वारे नभसि सघने संस्थितो द्वारभूमौ
शीते स्फीते तुहिनपवने ऽनावृतो हृष्टरोमा।
ग्रीष्मोन्मादे दहनकिरणे धावमानो वृषार्के
त्वं निःशङ्ङ्क प्रतिनिधिरहो भारतीयप्रजानाम्॥

वस्तुतः सामान्यजनतायाः मर्मव्यथा यथा नवीनेषु मुक्तकादिषु प्रकटीक्रियते ऽधुना न तथा पुरातनप्रबन्धेषु सा प्रकटीभूता। साम्प्रतिकः संस्कृतकविर्नवीनं मेघदूतं विरचयति। कविर्जगन्नाथ- पाठको ऽन्तर्मेघदूतकाव्य आह—

कोऽपि प्रीतः प्रकटमहिमा सौख्यसम्मोदमत्तौ
हर्यारूढो विलसति मुहुः पानसक्तो ऽङ्गनाभिः।
शोकेनास्तङ्ङ्गमितमहिमा रिक्तसर्वस्वराशिः
स्वस्योपेक्षां सततसहनो नैव निद्राति कश्चित्।
वैषम्याख्यो वलति विषमो व्याधिरेषोऽत्र लोके
मात्स्यन्यायो नयति सकलं जीवनं क्वापि गर्ते।
कारुण्यार्द्रः क्षणमपि बुधश्चक्षुषा कश्च पश्येद्
दीनानादीनवपरिगतानश्रुसङ्कीर्णनेत्रान्॥

चन्द्रभानुस्त्रिपाठी आषाढस्य प्रथम दिवस इति समस्यापूर्ती कृषकस्य स्वाधिकारवञ्चितत्वं सकरुण निरूपयति।

कश्चिद् दीनः कृपणकृषकः स्वाधिकारे नियुक्तः
कन्योद्वाहं विभवबहुलं स्थापयित्वा कथञ्चिद्।
अन्नं स्वर्णं तिलगुडघृतानीष्टमिष्टानि चैव
सर्वैः सार्धं दुहितुरकरोत् पीतपाणिं प्रसन्नः॥
ज्ञात्वा तुष्टं न वरपितरं सोऽदवाद् युग्यगावौ
नीत्वा मासान् कतिचिदबलापुत्रयुक्तो वराकः।
आषाढस्य प्रथमदिवसे श्याममालोक्य मेघं
कृष्टिर्वर्षे कथमिह भवेदित्यनाथो रुरोद॥

केचन कवय आधुनिकी समाजवादधारां श्रितवन्तो वर्तमानसमाजे वर्गसङ्घर्षं निरूपयन्तो मानवाधिकारभावं दृढयाञ्चक्रुः स्वकाव्ये। वर्गविषमतैव सामान्यजनानामधिकारहन्त्री। यथा यथा समकालिकसंस्कृतकाव्ये वर्गसङ्घर्षचेतना समेधते, तथा तथा सन्धुश्रिता भवत्यत्र जनताधिकारचेतनापि। तद्यथा कथयति मञ्जुलमयंकपन्तुलः —

समानधर्मिणौ द्वौ पुरुषौ
उभयोरेको भोगं स्वदते।
उदरज्वालया अन्यो दग्धः
पशुवद् बीभत्सं म्रियते।

कृष्णदत्तशर्मा शास्त्री भारवाहशतके कुलीतिसंज्ञकानां भारवाहानां कठिनं जीवनं विषयीकरोति। तत्रैव भारवाहकानां शिशवः कथं शिक्षाधिकारादपि वञ्चिता इति निरूपयन्नयं लिखति—

ये भारवाहतनयाः किल पाठनीया-
स्ते चापि कोमलधियो जनकैः स्वकीयैः।
साकं प्रयान्ति कठिनं श्रममाचरन्तो
जानन्ति नेदमपि तेऽध्ययनं किमस्ति॥

व्योमशेखरस्याग्निजेति काव्यसङ्ग्रहे श्रमिकायाः बालः इति कवितापि श्रमिकशिशोः दशां प्रस्तौति। अङ्कयरसुब्रह्मण्यस्य-पद्य- पुष्पाञ्जलिः इति सङ्ग्रहे श्रमप्रशंसा अवस्करहरणम् इति काव्यद्वयमपि उदाहरणीयम्। अवस्करहरणम् इति कविता शिरसि विष्ठाया मलस्य वा राशिं वाहं वाहं नगरस्य विशुद्धिं कुर्वतो महत्तराणां जीवनं विषयीकरोति, तासांश्च पूज्यान् नमस्यांश्च निरूपयति।
अस्माकं जनतालहरी, रोटिकालहरीप्रभृतीनि काव्यान्यप्यत्र निदर्शनानि। जनतालहर्यां तु सामान्यजनाः कथं प्रतारिता अपि क्लिष्टा अपि जिजीविषन्ति सङ्घर्षरताश्च भवन्तीति चित्रितम्। तथाहि—

क्षेत्रे स्वे श्रमबिन्दुचित्रिततनुर्यो वै तपस्तप्यते
तं निर्वास्य दुराग्रहात् स्ववसतेराच्छिद्य भूमिं ततः।
आक्रम्यातिमदादगण्यमिव तं मत्वा जनं निर्भया
विक्रामन्ति च साट्टहासमधुना चञ्चा मनुष्याः सुखम्॥ (20)

पाञ्चाल्या इव कृष्यते हतधिया दुःशासनेनानिशं
यस्या वस्त्रमपीह चैव वदनाद् ग्रासस्तथा च्छिद्यते।
आमूलं छलिता ऽशुभैर्नृपशुभिः कौटिल्यनीत्या च या
सैवेयं जनता हता विदलिता कष्टां दशां प्रापिता॥
एकत्रानविचुम्बिभिः प्रसूमरैः सौधैः समुत्सार्यते
दुर्नीतिप्रचितैः परत्र विदधद्दावाग्निनिर्दह्यते।
अन्यत्रप्रतिगामिभूमिपतिभिः कुद्दालकैश्छिद्यते
दूर्वेव प्रतिरोहतीह जनता विन्ध्याद्रिभूमौ तता॥

दवे-इत्युपाह्वस्य श्रीरामस्य भृत्याभरणम् काव्यम् भृत्यायै सङ्घर्षरतानां यूनां दुर्दशां विषयीकरोति। केचन संस्कृतकवयो सव्यङ्ग्यं सनर्माकूतं यथार्थदृशा च दीन-हीन-जनानां वास्तविकतां सटीकमुट्टङ्कयाम्बभूवुः। तद्यथा सद्यः प्रकाशिते दीपकघोषस्य राजनीतिलीलामृतकाव्ये विडम्बनपरं प्रादर्शि कविना राजनीतिलीला। तत्रैव राजनीत्या ऽद्यतन्या कथं जनानामधिकारा आच्छिद्यन्त इत्यपि सनर्म सम्मार्वगाहनं च चित्रितम्। दिङ्मात्रमुदाह्रियते

अन्तर्हिताः क्व श्रमवृत्तिजीविनस्तवैन्द्रजालेन वदेन्द्रजालिके।
तवैव मन्त्रेण वदाद्य मन्त्रिणी ! गताः क्व प्रत्यागमनाय नैव॥

वृत्तिच्युता वृत्तिगता भवन्ति वृत्तौ स्थिता ये तु ततश्च्युतास्ते।
क्रीडाद्धुता क्रीडनकै स्तवैषा शिल्पे ऽथवा शिल्पिगता यदृच्छा॥
वृत्तेश्च्युतानां हतभाग्यपुंसां स्त्रीपुत्रकन्याः स्वजनाः प्रियाश्चेत्।
क्षुत्पीडिता घ्नन्ति ततः स्वमेव हेतुस्त्वमेवेति न विस्मर त्वम्॥ (28.30.31)

इत्थं साम्प्रतिके संस्कृतसाहित्यं मानवाधिरचेतना यथा सम्पन्ना जागरूका च दरीदृश्यते न तथा पुरा विरचिते साहित्ये क्वापीति दिक्। बींसवीं शताब्दी इति ग्रन्थे परिशीलिता अस्य उलब्धयः। दिङ्मात्रं चेतनाप्रवाहरीतेरन्यदुदाहरणद्वयं प्रस्तूयते— 'दुःखमध्ययनम्। तत्र च अनुसन्धानं दुष्करम्। तस्मिन् च आकलनं च खेदकरम्। सत्यनिरूपणं च विवादाय एव। समीक्षा ईर्ष्याजर्जरा। फलं तु केवलम् अलङ्करणम्। उपयोगः पुनः द्विदिनजीविकानिमित्तम्। अतः अध्ययनम् उपाधिः। उपाधिश्च समाजिकता। दाम्पत्यनिमित्तं मानदण्डः। विवाहार्थं धनलाभस्य उपायः। एतदर्थं मिली अध्ययनम् आरब्धवती।'

**सन्दर्भ सूची**

1. विना युद्धं विना शस्त्रं विना सेनाश्च भीषणाः। विना नीतिं पुरा द्वीपा भारतीयैर्विनिर्जिताः॥ (बृ०भा० 12)
2. किं मुधा रक्तपातेन किं वा नो भूमिकाम्याय। इत्येवं धर्मजिष्णुत्वं कामयाञ्जक्रिरे हि ते॥ (बृ०भा० 13)
3. बृ०भा०– II 23।
4. बृ०भा०– II 24–25।
5. बृ०भा०– II 31।
6. कम्बुजद्वीपवर्णनम्, बृ०भा० 36–37।
7. बृ०भा०– 44–50।